# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा - शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम्** - ४ | गुणाः - ७० |
| विषयः - संस्कृतसम्भाषणम् | **कोड** O.E.- 1.1.1 | समयः - ३:०० तः ६:०० |
| दिनाङ्कः - ८.१२.२०१६ | सन्दर्भग्रन्थः - प्रथमा दीक्षा (राष्ट्रियसंस्कृतसंस्थानेन प्रकाशित) | |

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ कोष्ठके दत्तानां प्रातिपदिकानां समुचितैः रूपैःकानि अपि अष्ट रिक्तस्थानानि पूरयत (८)

उदाहरणम् - प्रश्नः - ______ लेखन्यौ स्तः। (एतद्)

उत्तरम् - एते लेखन्यौ स्तः।

(अ) _______ विद्यालयं गच्छति। (एतद्)
(आ) _______ मम पाठशाला अस्ति। (तद्)
(इ) _______ मम पुस्तकं नीतवान्? (किम्)
(ई) _______ घटी तुभ्यं रोचते? (किम्)
(उ) _____छात्राः अध्ययनं न कुर्वन्ति? (किम्)
(ऊ) _______ पाठयतः तौ मम शिक्षकौ। (यद्)
(ऋ) _______ गृहाणि सुन्दराणिसन्ति। (तद्)
(ऌ) _______ नदी स्वच्छा अस्ति। (एतद्)
(ए) _______ भगिन्यः कुत्र निवसन्ति? (एतद्)
(ऐ) _______ युवकौ स्तः। (एतद्)

प्रश्नः २ कोष्ठके दत्तानां धातूनां समुचितै वर्तमानकालिकरूपैः अष्ट रिक्तस्थानानि पूरयत (८)

उदाहरणम् - प्रश्नः - तौ युवकौ _____। (अस्)

उत्तरम् - तौ युवकौ स्तः।

(क) एते गृहिण्यौ ____। (अस्)
(ख) रामः स्वयमेव पाकं ____ । (कृ)
(ग) सैनिकाः देशस्य रक्षणं ______ । (कृ)
(घ) भगिन्यौ अध्ययनं ______ । (कृ)
(ङ) वयं व्यायामं _______ । (कृ)
(च) युवां किं______। (कृ)
(छ) त्वं वेगेन धावनं _____। (कृ)
(ज) त्वम् ईश्वरस्य भक्तः ______ । (अस्)
(झ) यूयं पण्डिताः_____। (अस्)
(ञ) सिंहः राष्ट्रपशुः______। (अस्)

प्रश्नः ३ कानि अपि चत्वारि वाक्यानि बहुवचने परिवर्तयत (४)

उदाहरणम् - प्रश्नः - मयूरः विहारं करोति।

उत्तरम् - मयूराः विहारं कुर्वन्ति

(क) गजः वने अस्ति।
(ख) अहं वेणुवादनं करोमि
(ग) गृहं प्रशस्तम् अस्ति
(घ) माला भग्ना अस्ति।
(ङ) भवती गृहकार्यं करोति।
(च) त्वम् ओदनं पचसि।

प्रश्नः ४ कानिचन पञ्च वाक्यानि द्विवचने परिवर्तयत (५)

उदाहरणम् - प्रश्नः - कः कोलाहलं करोति?

उत्तरम् - कौ कोलाहलं कुरुतः?

(क) का गीतं गायति?
(ख) एषा शूरा अस्ति।
(ग) त्वं भोजनं करोषि।
(घ) शिक्षिका सम्यक् पाठयति।
(ङ) सेवकः परिचर्यां करोति।
(च) सः वेगेन धावति।
(छ) एषा मम भगिनी अस्ति।

## द्वितीयान्वितिः (युनिट - २)

प्रश्नः ५ अधः दत्तेषु केषाञ्चित् अष्टानां शब्दानां त्रिषु अपि वचनेषु द्वितीयान्तानि रूपाणि लेखनीयानि (८)

उदाहरणम् - प्रश्नः - मन्त्र उत्तरम् - मन्त्रम्, मन्त्रौ, मन्त्रान्

(अ) तद् (पुं) (इ) युष्मद् (उ) क्षेत्र (नपुं) (ऋ) कूपी (ए) यद् (नपुं)

(आ) अस्मद् (ई) ग्राम (पुं) (ऊ) विद्या (ऌ) किम् (पुं) (ऐ) भवती

प्रश्नः ६ कोष्टके दत्तानां धातूनां समुचितैः रूपैः अष्ट रिक्तस्थानानि पूरय (८)

उदाहरणम् - प्रश्नः - युवकौ तरणं _____। (ज्ञा)

उत्तरम् - युवकौ तरणं जानीतः।

(क) वयं राष्ट्राय स्वप्राणान् अपि________। (दा)

(ख) त्वं किमर्थम् अध्ययने ध्यानं न________। (दा)

(ग) मम मित्राणि मां सम्यक्_________। (ज्ञा)

(घ) किं वयम् अस्वच्छतायाः परिणामान्________ ? (ज्ञा)

(ङ) ग्रमस्थाः नेतुः भाषणं गम्भीरतया________। (श्रु)

(च) यूयं गीतोपदेशं ________। (श्रु)

(छ) मृत्युकाले यमराजः जीवं केशेषु_______। (ग्रह्)

(ज) नवरात्रोत्सवे वयं सर्वेऽपि भागं________। (ग्रह्)

(झ) वयं परीक्षायै सम्यक् सज्जतां________। (कृ)

(ञ) सफलजीवनस्य रहस्यम् अहं_________। (ज्ञा)

प्रश्नः ७ अधःदत्तानां वाक्यानां क्रियापदानि लोट्-लकारे (आज्ञार्थे) परिवर्त्य कानि अपि चत्वारि वाक्यानि पुनः लिखत (४)

उदाहरणम् - प्रश्नः - भवान् ग्रामं गच्छति

उत्तरम् - भवान् ग्रामं गच्छतु

(क) भवती यानं मन्दं चालयति।

(ख) भवान् आदिनम् अध्ययनं न करोति।

(ग) भवन्तौ मिष्टान्नं खादतः।

(घ) भवत्यः नूतनानि वस्त्राणि धरन्ति।

(ङ) भवन्तः सर्वं रहस्यं जानन्ति।

(च) भवत्यौ संस्कृतग्रन्थान् पठतः

प्रश्नः ८ अधः दत्तेषु केषामपि पञ्चानाम् अव्ययानां स्ववाक्येषु प्रयोगं कुरु (५)

उदाहरणम् - प्रश्नः - अपि उत्तरम् - चिन्टू निद्रायाम् अपि वार्तालापं करोति

(क) एव (ग) च (ङ) यदि - तर्हि (छ) अद्य

(ख) इति (घ) अतः (च) इदानीम् (ज) कदा

## तृतीयान्वितिः (युनिट - ३)

प्रश्नः ९ अधोदत्तानां वाक्यानां क्रियापदानि लङ्-लकारे (भूतकाले) परिवर्त्य कानि अपि चत्वारि वाक्यानि पुनः लिखत (८)

उदाहरणम् - प्रश्नः - भवान् ग्रामं गच्छति

उत्तरम् - भवान् ग्रामम् अगच्छत्।

(क) अश्वः वेगेन धावति।

(ख) रामः सर्वान् राक्षसान् मारयति।

(ग) भीमः गदया युद्धं करोति।

(घ) हनुमान् लङ्कां दहति।

(ङ) अहं पाठशालां गच्छामि

(च) त्वं मां पीडयसि

(छ) धेनवः सर्वत्र चरन्ति।

(ज) सोमवासरे सोमनाथस्य पूजा भवति।

(झ) भवन्तः उत्सवस्य सज्जतायां व्यस्ताः भवन्ति।

(ञ) यूयं परिश्रमस्य फलं विन्दथ

प्रश्नः १० अधो लिखितेषु वाक्येषु निर्देशानुसारं परिवर्तनं कुरुत(कानि अपि अष्ट) (८)

उदाहरणम् - प्रश्नः - सैनिकः रणाङ्गणं गतवान्।(वाक्यं द्विवचने परिवर्तयत)

उत्तरम् - सैनिकौ रणाङ्गणं गतवन्तौ।

(क) रामः शत्रूणां संहारं कृतवान्(क्तवतु-प्रत्ययान्तस्य स्थाने धातोः लङ्-लकारे प्रयोगं कृत्वा वाक्यं पुनः लिखत)

(ख) वत्साः दुग्धं पिबन्ति।(वाक्यं भविष्यकाले परिवर्तयत)

(ग) त्वं रैलयानेन देहलीम् अगच्छः।(क्रियापदस्य स्थाने क्तवतु-प्रत्ययान्तस्य उपयोगं कृत्वा वाक्यं पुनः लिखत)

(घ) भवान् हिमालयम् आरोहति।(वाक्यं भूतकाले परिवर्तयत)

(ङ) बालः पाथेयम् अनयत्।(वाक्यं द्विवचने परिवर्तयत)

(च) आचार्या विश्वविद्यालये अध्यापितवती। (वाक्यं द्विवचने परिवर्तयत)

(छ) उमा कथनस्य तात्पर्यं ज्ञास्यति। ('उमा' इत्यस्य पदस्य स्थाने 'त्वम्' इति पदं प्रयुज्य वाक्यंपुनः रचयत)

(ज) विष्णुः क्षीरसागरे उषितवान्।(अत्र 'विष्णु' इत्यस्य शब्दस्य स्थाने 'लक्ष्मीः' इति शब्दं प्रयुज्य वाक्यं रचयत)

(झ) पण्डिताः शास्त्रविषये वदन्ति। (वाक्यं भविष्यकाले परिवर्तयत)

(ञ) अद्य श्रोतारौ श्रीमद्भागवतविषये व्याख्यानं शृणुतः।('अद्य' इत्यस्य शब्दस्य स्थाने 'श्वः' इति शब्दं प्रयुज्य वाक्यं पुनः रचय)

प्रश्नः ११ अधो निर्दिष्टेषु कयोः अपि द्वयोः पदयोः स्ववाक्ये प्रयोगं कुरुत (२)

उदाहरणम् - प्रश्नः - दास्यति

उत्तरम् - राजा शरणागतेभ्यः आश्रयं दास्यति।

(क) स्थास्यसि (ख) करिष्यथ (ग) योजयिष्यामि (घ) तरिष्यति

प्रश्नः १२ द्वयोः स्तम्भयोः परस्परसम्बद्धानि पदानि योजयत। (२)

उदाहरणम् - (क) - (उ)

| | |
|---|---|
| (क) स्थितवती | (अ) त्वम् |
| (ख) हतवान् | (आ) यूयम् |
| (ग) अनयत | (इ) बालिके |
| (घ) श्रोष्यामः | (ई) वयम् |
| (ङ) चलितवत्यौ | (उ) माता |

***